# shrIDattatreya Upanishad

# શ્રીદત્તાત્રેયોપનિષત્

## Document Information

Text title : Dattatreya Upanishad

File name : dattatreya.itx

Category : upanishhat, svara, dattAtreya

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 101 / 108; Atharva Veda - Vaishnava upanishad

Latest update : April, 19, 2000, August 11, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# શ્રીદત્તાત્રેયોપનિષત્

દત્તાત્રેયીબ્રહ્મવિદ્યાસંવેદ્યાનન્દવિગ્રહમ્ ।
ત્રિપાન્નારાયણાકરં દત્તાત્રેયમુપાસ્મહે ॥

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવા ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાꣳ સસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ  સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ  સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ ॥ સત્યક્ષેત્રે બ્રહ્મા નારાયણં મહાસામ્રાજ્યં કિં
તારકં તન્નો બ્રૂહિ ભગવન્નિત્યુક્તઃ સત્યાનન્દ સાત્ત્વિકં મામકં
ધામોપાસ્વેત્યાહ । સદા દત્તોઽહમસ્મીતિ પ્રત્યેતત્સંવદન્તિ યેન તે
સંસારિણો ભવન્તિ નારાયણેનૈવં વિવક્ષિતો બ્રહ્મા વિશ્વરૂપધરં
વિષ્ણું નારાયણં દત્તાત્રેઅયં ધ્યાત્વા સદ્વદતિ । દમિતિ હંસઃ ।
દામિતિ દીર્ઘં તદ્બીજં નામ બીજસ્થમ્ । દામિત્યેકાક્ષરં ભવતિ ।
તદેતત્તારકં ભવતિ । તદેવોપાસિતવ્યં વિજ્ઞેયં ગર્ભાદિતારણમ્ ।
ગાયત્રી છન્દઃ । સદાશિવ ઋષિઃ । દત્તાત્રેયો દેવતા । વટબીજસ્થમિવ
દત્તબીજસ્થં સર્વં જગત્ । એતદૈવાક્ષરં વ્યાખ્યાતમ્ ।

દત્તાત્રેયષડક્ષરમન્ત્રઃ

વ્યાખ્યાસ્યે ષડક્ષરમ્ । ઓમિતિ પ્રથમમ્ । શ્રીમિતિ દ્વિતીયમ્ ।
હ્રીમિતિ તૃતીયમ્ । ક્લીમિતિ ચતુર્થમ્ । ગ્લૌમિતિ પઞ્ચમમ્ ।
દ્રામિતિ ષટ્કમ્ । ષડક્ષરોઽયં ભવતિ । સર્વસમ્પદ્વૃદ્ધિકરી ભવતિ ।
યોગાનુભવો ભવતિ । ગાયત્રી છન્દઃ । સદાશિવ ઋષિઃ । દત્તાત્રેયો
દેવતા । ૐ શ્રીં હ્રીં ક્લીં ગ્લૌં દ્રાં ઇતિ ષડક્ષરોઽયં ભવતિ ।

દ્રમિત્યુક્ત્વા દ્રામિત્યુક્ત્વા વા દત્તાત્રેયાય નમ ઇત્યષ્ટાક્ષરઃ ।

દત્તાત્રેયાયેતિ સત્યાનન્દચિદાત્મકમ્ । નમ ઇતિ પૂર્ણાનન્દકવિગ્રહમ્ ।
ગાયત્રી છન્દઃ । સદાશિવ ઋષિઃ । દત્તાત્રેયો દેવતા । દત્તાત્રેયાયેતિ
કીલકમ્ । તદેવ બીજમ્ । નમઃ શક્તિર્ભવતિ । ઓમિતિ પ્રથમમ્ । આમિતિ
દ્વિતીયમ્ । હ્રીમિતિ તૃતીયમ્ । ક્રોમિતિ ચતુર્થમ્ । એહીતિ તદેવ વદેત્ ।
દત્તાત્રેયેતિ સ્વાહેતિ મન્ત્રરાજોઽયં દ્વાદશાક્ષરઃ । જગતી છન્દઃ ।
સદાશિવ ઋષિઃ । દત્તાત્રેયો દેવતા । ઓમિતિ બીજમ્ ।
સ્વાહેતિ શક્તિઃ । સમ્બુદ્ધિરિતિ કીલકમ્ । દ્રમિતિ હૃદયે ।
હ્રીં ક્લીમિતિ શીર્ષે । એહીતિ શિખાયામ્ । દત્તેતિ કવચે ।
આત્રેયેતિ ચક્ષુષિ । સ્વાહેત્યસ્ત્રે । તન્મયો ભવતિ ।
ય એવં વેદ । ષોડશાક્ષરં વ્યાખ્યાસ્યે ।
પ્રાણં દેયમ્ । માનં દેયમ્ । ચક્ષુર્દેયમ્ । શ્રોત્રં દેયમ્ ।
ષડ્દશશિરશ્છિનત્તિ ષોડશાક્ષરમન્ત્રે ન દેયો ભવતિ ।
અતિસેવાપરભક્તગુણવચ્છિષ્યાય વદેત્ । ઓમિતિ પ્રથમં ભવતિ ।
ઐમિતિ દ્વિતીયમ્ । ક્રોમિતિ તૃતીયમ્ । ક્લીમિતિ ચતુર્થમ્ ।
ક્લૂમિતિ પઞ્ચમમ્ । હ્રામિતિ ષષ્ઠમ્ । હ્રીમિતિ
સપ્તમમ્ । હ્રૂમિત્યષ્ટમમ્ । સૌરિતિ નવમમ્ ।
દત્તાત્રેયાયેતિ ચતુર્દશમ્ । સ્વાહેતિ ષોડશમ્ ।
ગાયત્રી છન્દઃ । સદાશિવ ઋષિઃ । દત્તાત્રેયો દેવતા ।
ૐ બીજમ્ । સ્વાહા શક્તિઃ । ચતુર્થ્યન્તં કીલકમ્ ।
ઓમિતિ હૃદયે । ક્લાં ક્લીં ક્લૂમિતિ શિખાયામ્ । સૌરિતિ
કવચે । ચતુર્થ્યન્તં ચક્ષુષિ । સ્વાહેત્યસ્ત્રે । યો
નિત્યમધીયાનઃ સચ્ચિદાનન્દ સુખી મોક્ષી ભવતિ ।
સૌરિત્યન્તે શ્રીવૈષ્ણવ ઇત્યુચ્યતે । તજ્જાપી વિષ્ણુરૂપી
ભવતિ । અનુષ્ટુપ્ છન્દો વ્યાખ્યાસ્યે । સર્વત્ર
સમ્બુદ્ધિરિમાનીત્યુચ્યન્તે । દત્તાત્રેય હરે કૃષ્ણ
ઉન્મત્તાનન્દદાયક । દિગમ્બર મુને બાલપિશાચ
જ્ઞાનસાગર ॥ ૧॥ ઇત્યુપનિષત્ । અનુષ્ટુપ્ છન્દઃ ।
સદાશિવ ઋષિઃ । દત્તાત્રેયો દેવતા દત્તાત્રેયેતિ હૃદયે ।
હરે કૃષ્ણેતિ શીર્ષે । ઉન્મત્તાનન્દેતિ શિખાયામ્ ।
દાયકમુન ઇતિ કવચે । દિગમ્બરેતિ ચક્ષુષિ ।
પિશાચજ્ઞાનસાગરેત્યસ્ત્રે । આનુષ્ટુભોઽયં
મયાધીતઃ । અબ્રહ્મજન્મદોષાશ્ચ પ્રણશ્યન્તિ ।

સર્વોપકારી મોક્ષી ભવતિ । ય એવં વેદેત્યુપનિષત્ ॥ ૧॥

ઇતિ પ્રથમઃ ખણ્ડઃ ॥ ૧॥

ઓમિતિ વ્યાહરેત્ । ૐ નમો ભગવતે દત્તાત્રેયાય
સ્મરણમાત્રસન્તુષ્ટાય મહાભયનિવારણાય
મહાજ્ઞાનપ્રદાય ચિદાનન્દાત્મને બાલોન્મત્ત-
પિશાચવેષાયેતિ મહાયોગિનેઽવધૂતાયેતિ
અનસૂયાનન્દવર્ધનાયાત્રિપુત્રાયેતિ સર્વકામફલ-
પ્રદાય ઓમિતિ વ્યાહરેત્ । ભવબન્ધમોચનાયેતિ
હ્રીમિતિ વ્યાહરેત્ । સકલવિભૂતિ દાયેતિ ક્રોમિતિ વ્યાહરેત્ ।
સાધ્યાકર્ષણાયેતિ સૌરિતિ વ્યાહરેત્ । સર્વમનઃ-
ક્ષોભણાયેતિ શ્રીમિતિ વ્યાહરેત્ । મહોમિતિ વ્યાહરેત્ ।
ચિરઞ્જીવિને વષડિતિ વ્યાહરેત્ । વશીકુરુવશીકુરુ
વૌષડિતિ વ્યાહરેત્ । આકર્ષયાકર્ષય હુમિતિ
વ્યાહરેત્ । વિદ્વેષયવિદ્વેષય ફડિતિ વ્યાહરેત્ ।
ઉચ્ચાટયોચ્ચાટય ઠઠેતિ વ્યાહરેત્ । સ્તમ્ભય-
સ્તમ્ભય ખખેતિ વ્યાહરેત્ । મારયમારય નમઃ
સમ્પન્નાય નમઃ સમ્પન્નાય સ્વાહા પોષયપોષય
પરમન્ત્રપરયન્ત્રપરતન્ત્રાંશ્છિન્ધિચ્છિન્ધિ
ગ્રહાન્નિવારયનિવારય વ્યાધીન્નિવારયનિવારય દુઃખં
હરયહરય દારિદ્ર્યં વિદ્રાવયવિદ્રાવય દેહં
પોષયપોષય ચિત્તં તોષયતોષયેતિ સર્વમન્ત્ર-
સર્વયન્ત્રસર્વતન્ત્રસર્વપલ્લવસ્વરૂપાયેતિ ૐ નમઃ
શિવાયેત્યુપનિષત્ ॥ ૨॥

ઇતિ દ્વિતીયઃ ખણ્ડઃ ॥ ૨॥

ય એવં વેદ । અનુષ્ટુપ્ છન્દઃ । સદાશિવ ઋષિઃ ।
દત્તાત્રેયો દેવતા । ઓમિતિ બીજમ્ । સ્વાહેતિ શક્તિઃ ।
દ્રામિતિ કીલકમ્ । અષ્ટમૂર્ત્યષ્ટમન્ત્રા ભવન્તિ ।
યો નિત્યમધીતે વાય્વગ્નિસોમાદિત્યબ્રહ્મવિષ્ણુરુદ્રૈઃ
પૂતો ભવતિ । ગાયત્ર્યા શતસહસ્રં જપ્તં ભવતિ ।
મહારુદ્રશતસહસ્રજાપી ભવતિ । પ્રણવાયુતકોટિજપ્તો ભવતિ ।

શતપૂર્વાઞ્છતાપરાન્પુનાતિ । સ પઙ્ક્તિપાવનો ભવતિ ।
બ્રહ્મહત્યાદિપાતકૈર્મુક્તો ભવતિ । ગોહત્યાદિપાતકૈર્મુક્તો ભવતિ ।
તુલાપુરુષાદિદાનૈઃ પ્રપાપાનતઃ પૂતો ભવતિ ।
અશેષપાપાન્મુક્તો ભવતિ । ભક્ષ્યાભક્ષ્યપાપૈર્મુક્તો ભવતિ ।
સર્વમન્ત્રયોગપારીણો ભવતિ । સ એવ બ્રાહ્મણો ભવતિ ।
તસ્માચ્છિષ્યં ભક્તં પ્રતિગૃહ્ણીયાત્ । સોઽનન્તફલમશ્નુતે ।
સ જીવન્મુક્તો ભવતીત્યાહ ભગવાન્નારાયણો બ્રહ્માણમિત્યુપનિષત્ ॥

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવા ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ॥

સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાँ સસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ॥

ૐ સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ હરિઃ ૐ તત્સત્ ॥

ઇતિ દત્તાત્રેયોપનિષત્સમાપ્તા ॥

Encoded and proofread by Sunder Hattangadi

*shrIDattatreya Upanishad*
pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*